# शब्दविमर्शः (क्विप्रत्ययान्तशब्दानामवलोकनम्।)

डा. वि.आर्.मनोज् - ऐ. ऐ. टि. काण्पुर

## लब्धिमम्।

प्रायशो लोके योषितः विषमस्थं जहति समस्थमनुरज्यन्ते च। भर्तरि पुत्रे भ्रातरि च स्त्रीणामयं स्वभावः। तदुक्तमगस्त्येन रामायणे –

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन।

समस्थमनुरज्यन्ते विषमस्थं त्यजन्ति च।। इति। (13.5.अरण्यकाण्डम्।)

किन्त्वस्यापवादः सीतेत्यनुपदमेवाब्रवीन्महात्मा अगस्त्यः।

इयञ्च भवतो भार्या दोषैरेतैर्विवर्जिता।

श्लाघ्या च व्यपदेश्या च यथा देवीष्वरुन्धती।। इति। (13.7.अरण्यकाण्डम्।)

सैव सीता प्रणष्टेति सुन्दरकाण्डे हनुमान् ब्रूते -

मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया।

यदि सीता हि दुःखार्ता कालो हि दुरतिक्रमः।। इति। (16.3.सुन्दरकाण्डम्।)

कारणमपि तत्रैवोक्तं कालो हि दुरतिक्रम इति। दुरतिक्रमस्य कालस्य करालहस्तात् को वा मुच्येत भाग्यवान्। तथा च भर्तृहरिः -

गजभुजङ्गविहङ्गमबन्धनं शशिदिवाकरयोर्ग्रहपीडनम्।

मतिमताञ्च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः।। इति। (नीतिशतकम् .85)

किमर्थोऽयमुल्लेखः ? भट्टिकाव्यस्थः सीतान्वेषणप्रसङ्गः पुनरपि स्मृतिपथमागतः। तत्र प्रसङ्गादिदमुक्तमुपोद्घातरूपेण। सीतान्वेषणतत्पराणां हनूमत्प्रभृतिप्लवङ्गमानां मार्गे स्वयम्प्रभादर्शनं तद्वारा श्रमापनोदनञ्च वर्णयति कविः। तं पद्यमुद्धर्तुकामः। श्रूयताम् -

सीतान्वेषणतत्पराः हनुमत्प्रमुखाः प्लवङ्गमाः दक्षिणामाशां मृगयन्तः श्रमापनोदनाय कस्मिँश्चित् गिरिनितम्बे निषेदुः। तत्र गुहाद्वारान्निसरतः पतत्रिणोऽपश्यन्। ततस्ते तस्यां गुहायां प्राविशन्। तत्र कोमलाङ्गीं कामपि कामिनीमद्राक्षुः। सा नानारसैः फलैः स्वादुशीतैः वारिभिश्च तान् तर्पयामास। तृप्तास्ते विस्मिताश्च तामप्राक्षुः -

"निघानिघतरुच्छन्ने तस्मिँस्ते लब्धिमैः फलैः।

तृप्तास्तां भ्राजथुमतीं पप्रच्छुः कस्य पूरियम् ।।" इति। (**7.65.**भट्टिकाव्यम्।)

निघानिघतरुच्छन्ने = निमितानिमितपादपाच्छन्ने, विष्वक्समाऽविष्वक्समवृक्षाच्छादिते इति भावः। तस्मिन् प्रघणे लब्धिमैः = लाभनिर्वृत्तैः फलैः आम्रादिभिः तृप्ताः ते वानराः भ्राजथुमतीं = शोभावतीं तां स्त्रियम् 'इयं सन्निकृष्टस्था पुरी कस्य इति पप्रच्छुः।

किमुवाच सा ? दुहिता मेरुसावर्णेरहं नाम्ना स्वयम्प्रभेत्युवाच।

पद्येऽस्मिन् विद्यमानः लब्धिमशब्दोऽत्र चर्चाविषयः। लब्धिमैः = लाभेन निर्वृत्तानि लब्धिमानि तैः। "डुलभष् प्राप्तौ" *(भ्वा.९७५)* इति धातोः "ड्वितः क्त्रिः" *(पा.सू.३.३.८८)* इति क्त्रिः प्रत्ययः। ततः "त्रेर्मम्नित्यम्" *(पा.सू.४.४.२०)* इति मप्।

अत्र "भावे" *(पा.सू.३.३.१८)* इत्यतः भावे इत्यनुवर्तते। तथा "अकर्तरि च कारके सँज्ञायाम्" *(पा.सू.३.३.१९)* इत्यतः अकर्तरि च कारके सँज्ञायाम् इत्यनुवर्तते। ततश्च भावे कर्तृवर्जिते कारके सँज्ञायां विषये इत्यनुवर्त्य ड्वितो धातोः (डु इत् यस्य - धातोः - तस्माद्) "ड्वितः क्त्रिः" *(पा.सू.३.३.८८)* इति सूत्रेण क्त्रिप्रत्ययो विधीयते। क्त्रिप्रत्ययान्तस्य शब्दस्य कृदन्तत्वात् "कृत्तद्धितसमासाश्च" *(पा.सू.१.२.४६)* इति सूत्रेण प्रातिपदिकसंज्ञा भवति। तस्मात् "त्रेर्मम्नित्यम्"

*(पा.सू.४.४.२०)* इति सूत्रेण तद्धितो मप् प्रत्ययो भवति। "त्रेर्मम्नित्यम्" *(पा.सू.४.४.२०)* इति सूत्रे नित्यम् इति वचनात् केवलो न प्रयुज्यते। अर्थाद् क्त्रिप्रत्ययान्तान्नित्यं मप् प्रत्ययो भवति। तथा च "नित्यग्रहणं स्वातन्त्र्यनिवृत्त्यर्थम्। तेन क्त्र्यन्तं नित्यं मप्प्रत्ययान्तमेव भवति। विषयान्तरे न प्रयोक्तव्य"मिति "क्त्रेर्मम्नित्यम्" *(पा.सू.४.४.२०)* इति सूत्रकाशिका।

भावाधिकारे विहितस्य क्त्रेः भावः (धातूक्तक्रियामात्रम्) अर्थः। तदन्ताद्विहितस्य निर्वृत्ते इत्यर्थः तत्र च "निर्वृत्तेऽक्षद्यूतादिभ्यः" *(पा.सू.४.४.१९)* इत्यतस्तदनुवृत्तेः। "तेन दीव्यति खनति जयति जितम्" *(पा.सू.४.४.२)* इत्यतः 'तेन' इति चानुवर्तते। धातुवाच्यक्रियावाचकः तच्छब्दः (तेन इति)।तथा च तेनेति तृतीयासमर्थाद् क्त्रिप्रत्ययान्तात् निर्वृत्ते इत्येतस्मिन्नर्थे मप् प्रत्ययः इत्यर्थो गम्यते। एवञ्च पक्त्रिममित्यत्र धातुवाच्यपाकक्रियया निर्वृत्तमित्यर्थः। ओदनः , सूपः , अपूपः , यवागूः इत्यादिभिः शेषः पूरणीयः। कृत्रिममित्यत्र धातुवाच्यकरणक्रियया निर्वृत्तमित्यर्थः। तथा च कृत्रिमम् वस्त्रम्। अकृत्रिमं पुष्पम् = प्रकृतिसिद्धमित्यर्थः।

ननु लब्धैरित्येवास्तु किं लब्ध्रिमैरिति। औद्धत्यं मा स्म मन्वत ! कवेः कवनकौशलं विमृष्टुं कः समर्थः ? तथापि लब्धलब्ध्रिमयोरर्थभेदः कः इति सन्देहः। "डुलभष् प्राप्तौ" *(भ्वा.९७५)* इति धातुः सकर्मकः। अतः कर्मणि क्तप्रत्यये लब्धम् इति स्यात्। क्रियाजन्यफलाश्रयं कर्म। लब्धम् इत्यत्र धनमित्यादौ शेषान्वयः। लब्धं धनमिति। लब्ध्रिममित्यादौ क्त्रिप्रत्ययान्तस्थलेत्वाश्रयत्वाकाङ्क्षा नास्ति। प्रत्युत तत्तद्धातुवाच्यक्रियाजन्यफलाश्रयं यत्कर्म तस्य तत्वेन विवक्षा। अर्थाद् यद्यत् लाभेन = लाभक्रियया निर्वृत्तं तत्सर्वं सामान्येन लब्ध्रिमशब्देन उच्यते। तथा च लब्धः ओदनः। लब्धं धनम्। लब्धः आदरः इत्यादौ ओदनः, धनम्, आदरः इत्येते सर्वेऽपि अर्थाः लब्ध्रिमशब्दवाच्याः। अर्थाद् लब्धशब्दे प्रयुक्ते आकाङ्क्षा भवति कर्मणः। तदेव आकाङ्क्षितं कर्म लब्ध्रिमशब्देनोच्यते। अयं तावदस्याल्पबुद्धेः विचारः। विद्वांसोऽत्र शरणम्।

***

वि . आर् . मनोज्